# केन्द्रीयसंस्कृतविश्वविद्यालयः

श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

## परिसरवार्ताः

)01–01-2024 तः 30-06-2024 पर्यन्तम्)

छात्राणामुपलब्धय

बेङ्गलूरुनगरे ०९-०१-२४, १०-०१-२४ दिनाङ्कयोः कर्णाटकसंस्कृतविश्वविद्यालयेन समायोजितासु राज्यस्तरीयशास्त्रस्पर्धासु अस्माकं परिसरस्य छात्राः भागं गृहीत्वा पुरस्कारान् समुपार्जयन् । परिसराध्यापकौ डा. रमानन्दभट्टवर्यः, डा.शिवकुमारी काटूरीवर्या च मार्गदर्शकत्वेन अत्र भागमवहताम् । पुरस्कारभाजनानां छात्राणां सूची इत्थमस्ति –

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**राजीवगान्धीपरिसरः, शृङ्गेरी**

**राज्यस्तरीयशास्त्रीयस्पर्धासु विजेतृणां छात्राणां सूची - 2023-24**

| क्र.सं | स्पर्धायाः नाम | स्पर्धार्थिनः नाम | कक्षा | स्थानम् |
|---|---|---|---|---|
| 1 | धर्मशास्त्रभाषणम् | श्रीधरः एन् एन् | आचार्यद्वितीयवर्षम् | प्रथमम् |
| 2 | साहित्यशलाकापरीक्षा | रूपा वि जोशी | आचार्यद्वितीयवर्षम् | प्रथमम् |
| 3 | मीमांसाशलाकापरीक्षा | रवितेजाः एम् एस् | आचार्यप्रथमवर्षम् | प्रथमम् |
| 4 | न्यायभाषणम् | मुक्ता लघाटे | शास्त्रितृतीयवर्षम् | प्रथमम् |
| 5 | अष्टाध्यायीकण्ठपाठः | चिन्ता अजयः | शास्त्रिप्रथमवर्षम् | प्रथमम् |
| 6 | व्याकरणभाषणम् | चन्द्रमौलि कल्याणः | आचार्यद्वितीयवर्षम् | द्वितीयम् |
| 7 | साहित्यशलाकापरीक्षा | भावना एस् वै | आचार्यद्वितीयवर्षम् | द्वितीयम् |
| 8 | ज्यौतिषशलाकापरीक्षा | सुधांशु शुक्लः | आचार्यद्वितीयवर्षम् | द्वितीयम् |
| 9 | साङ्ख्य-योगभाषणम् | ऋचिका कदम | आचार्यद्वितीयवर्षम् | द्वितीयम् |
| 10 | साहित्यभाषणम् | साई श्रेया एस् जि | आचार्यप्रथमवर्षम् | द्वितीयम् |
| 11 | जैन-बौद्धदर्शनभाषणम् | चन्द्रशेखरहेब्बारः | शिक्षाशास्त्रिप्रथमवर्षम् | द्वितीयम् |
| 12 | आयुर्वेदभाषणम् | देशपांडे श्रावणी चंद्रशेखर | शिक्षाशास्त्रिप्रथमवर्षम् | द्वितीयम् |
| 13 | भारतीयगणितशलाकपरीक्षा | राघव मिश्रा | शास्त्रिद्वितीयवर्षम् | द्वितीयम् |
| 14 | धातुरूपकण्ठपाठः | अ.शे.श्रीवत्साङ्कः | शास्त्रिद्वितीयवर्षम् | द्वितीयम् |
| 15 | ज्यौतिषभाषणम् | धीरज कुमारः | आचार्यद्वितीयवर्षम् | तृतीयम् |
| 16 | व्याकरणशलाकापरीक्षा | भार्गवि रामचन्द्र भट्टः | आचार्यद्वितीयवर्षम् | तृतीयम् |
| 17 | भारतीयगणितशलाकपरीक्षा | सत्यप्रमोदः एच् वी | आचार्यप्रथमवर्षम् | तृतीयम् |
| 18 | मीमांसाभाषणम् | अच्युत रा हेगडे | आचार्यप्रथमवर्षम् | तृतीयम् |
| 19 | साहित्यभाषणम् | मञ्जुनाथ गणपति हेगडे | आचार्यप्रथमवर्षम् | तृतीयम् |
| 20 | न्यायशलाकापरीक्षा | वलुष्का बहुगुणा | आचार्यप्रथमवर्षम् | तृतीयम् |
| 21 | वेदान्तशलाकापरीक्षा | सप्तमी के एन् | आचार्यप्रथमवर्षम् | तृतीयम् |
| 22 | पुराणेतिहासशलाकापरीक्षा | श्रीनिधिः भट्ट | आचार्यप्रथमवर्षम् | तृतीयम् |
| 23 | अर्थशास्त्रशलाकापरीक्षा | सुधन्वा आर् | शास्त्रितृतीयवर्षम् | तृतीयम् |
| 24 | अमरकोषकण्ठपाठः | रक्षिता एस् | शास्त्रिप्रथमवर्षम् | तृतीयम् |
| 25 | धातुरूपकण्ठपाठः | रम्या एस् | शास्त्रिप्रथमवर्षम् | तृतीयम् |

BellaBacaDesigns
BellaBacaDesigns

1. 8-2-24 तः 13-2-24 पर्यन्तं आधुनिकविषयविद्याशाखायाः पक्षतः छात्राणां शैक्षिकयात्रा आयोजिता । 41 छात्राणां दलेन सह डा. प्रभाकर एम्.ए. महोदयः, डा. शैलेशपवारमहोदयः, सुश्री सुमना एच्.एस्. महोदया च महाबलिपुरक्षेत्रस्य यात्रामकार्षुः ।
2. 7-2-24 दिनाङ्के "भारतस्य विकासयात्रायां संस्कृतस्य योगदानम्" इति विषये मुख्यालयेन आयोजितायां राष्ट्रस्तरीयस्पर्धायां शिक्षाशास्त्रिच्छात्रः श्रीसुदर्शन एम्, एस् प्रथमपुरस्कारं प्राप्नोत् ।
3. केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे आयोजिते विंशे अखिलभारतीयरूपकमहोत्सवे कृपणखल्वाटचरितमिति रूपकमभिनीय श्रीराजीवगान्धीपरिसरच्छात्रैः द्वितीयपुरस्कारः अवाप्तः । परिसरस्तरे नहुषः एन् मोराजे प्रथमं पुरस्कारम्, अनिरुद्धकाकत्करः द्वितीयपुरस्कारं, श्रीधरः एन् तृतीयपुरस्कारं, सुस्मितः एच् एम् सान्त्वनपुरस्कारं च प्राप्तवन्तः । परिसरप्राध्यापकौ डा. श्रीकरवर्यः, सुश्री सुमनामहोदया च छात्राणां मार्गदर्शकावास्ताम् । आचार्यः राघवेन्द्रभट्टमहोदयोऽपि विशेषोपस्थित्या छात्रान् प्रोत्साहितवान् ।
4. उत्तरप्रदेशे अयोध्याधाम्नि 18.3.24 तः 21.3.24 पर्यन्तं प्रवृत्तासु ऐषमः अखिलभारतीयशास्त्रस्पर्धासु अस्मत्परिसरस्य पञ्च छात्राः पुरस्कारान् अवाप्य कर्णाटकराज्यस्य विजयवैजयन्तीं समपादयन् । तत्र मीमांसाशलाकापरीक्षायां रवितेजः एम् एस् प्रथमस्थानं, मुक्ता लघाटे न्यायभाषणे प्रथमस्थानं, रूपा विवेकानन्द जोशी साहित्यशलाकायां प्रथमं स्थानं, चिन्ता अजयः अष्टाध्यायी कण्ठपाठे प्रथमस्थानं, श्रीधरः एन् एन् धर्मशास्त्रभाषणे तृतीयस्थानं च अवाप्नुवन् ।
5. तिरुपतौ राष्ट्रियसंस्कृतविश्वविद्यालये प्रवृत्ते अखिलभारतीयप्रातिभसमारोहे न्यायभाषणे सहना द्वितीयं स्थानं, व्याकरणभाषणे कल्याणः द्वितीयं स्थानं, ज्योतिषभाषणे आदित्यः तृतीयं स्थानं, सांख्ययोगभाषणे वेदान्तभाषणे च सप्तमी द्वितीयं स्थानं, धर्मशास्त्रभाषणे श्रीधरः तृतीयं स्थानं, बालिकानां बैडमिण्टनस्पर्धायां सिन्धुः द्वितीयं स्थानं, स्वातीगणः योगासने तृतीयं स्थानं च अवाप्य परिसरस्य यशोऽभ्यवर्धयन् ।
6. 26/05/24 दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली, Youth hostel association of India, तरुणोदयघटकः, शिवमोग्गा, गीर्वाणभारती, संस्कृतविभागः, श्री आदिचुञ्चनगिरिः, संस्कृतभारती, तरुणोदयसंस्कृतसेवासंस्था. शिवमोग्गा इत्येतासां संस्थानां संयुक्तावधानेन आयोजिते हिमाचलप्रदेशस्थे "चन्द्रकाणि पास्" इति क्षेत्रे पर्वतारोहणकार्यक्रमे परिसरपक्षतः श्री महान्तेश सबली (आचार्यप्रथमवर्षीयः) श्री गुरुकिरणबबलेश्वरः

BellaBacaDesigns

(शिक्षाशास्त्रिप्रथमवर्षीयः) इति छात्रौ भागं गृहीत्वा हिमालये संस्कृतध्वजमुत्तोलितवन्तौ ।

7. परिसरस्य द्वादश छात्राः अन्ताराष्ट्रिययोगदिवसमुपलक्ष्य गरल्यां वेदव्यासपरिसरे 20,21-06-24 दिनयोः आयोजितासु स्पर्द्धासु भागमगृह्णन् । तत्र शिक्षाशास्त्रिद्वितीयवर्षच्छात्रः श्रीनीलमणिः कुलपतिवर्यस्य हस्तात् तृतीयं पुरस्कारमवाप्नोत् ।

8. 20-05-24 तः 19-06-24 पर्यन्तं देवप्रयागे श्रीरघुनाथकीर्तिपरिसरे आयोजिते न्यायप्रशिक्षणवर्गे परिसरस्य नव छात्राः भागमगृह्णन् । तत्र आयोजितायां स्पर्धायां शलाकास्पर्धायां च सुश्री मुक्तालघाटे प्रथमं स्थानमवाप्नोत् । श्री सुधन्वा आर्, श्री सत्यप्रमोदः एच्. वी. च क्रमशः द्वितीयं तृतीयं च स्थानं प्राप्नुताम् ।

9. वेदान्तविद्याशाखायाः छात्रा कुमारी सप्तमी के.एन् शृङ्गेरीपरिसरे आयोजितायां वेदान्तप्रशिक्षणवर्गस्पर्धायां प्रथमपुरस्कारं प्राप्नोत् ।



(कर्णाटकसंस्कृतविश्वविद्यालये राज्यस्तरीयशास्त्रीयस्पर्धासु भागग्रहीतारः छात्राः मार्गदर्शकाभ्यां सह)

BellaBacaDesigns






मार्गदर्शकैः सह शैक्षिकयात्रायां परिसरीयाः छात्राः

BellaBacaDesigns

BellaBacaDesigns



(कृपणखल्वाटचरिताख्यरूपकस्य अभिनेतृगणः कुलपतिमुखैः सह)



(अयोध्यायाम् अखिलभारतीयशास्त्रस्पर्धासु अवाप्तविजयवैजयन्तीपुरस्कारः
कर्णाटकगणः)

BellaBacaDesigns




(हिमाचलप्रदेशे पर्वतमारूढवन्तौ गुरुकिरणमहान्तेशौ संस्कृतध्वजेन सह)



(तिरुपतौ प्रातिभसमारोहे शृङ्गेरीच्छात्रगणः मार्गदर्शकाभ्यां सह)

परिसरे प्रवृत्ताः कार्यक्रमाः

- गीता-ओलम्पियाड् उद्घाटनम् : ०४-०१-२०२४ दिने नवदेहल्यां प्रवृत्तस्य गीता-ओलम्पियाड्-उद्घाटनकार्यक्रमस्य परिसरेऽपि प्रसारणं कृतं, यत्र परिसरीयाः निदेशकाध्यापकच्छात्राः भागमग्रहीषुः ।

- वाग्वर्धिनीपरिषद् : ०४-०१-२०२४ दिने वाग्वर्धिनीपरिषदः अधिवेशनं प्रवृत्तं यत्र पञ्चभिः छात्रैः शास्त्रीयविषयाः प्रस्तुताः । डा. एस्. वेङ्कटेशताताचार्यमहोदयः तत्राध्यक्षतां निरवहत् । एवं ११-०२-२०२४ दिने प्रवृत्ते कनिष्ठस्तरस्य अधिवेशने छात्राः विषयं प्रास्तुवन् । तत्र श्रीकर.वि महोदयेन अध्यक्षता निरूढा ।

- अभिभावकाध्यापकसंघस्य समावेशः : ०५-०१-२०२४ दिने निदेशकैः सह अभिभावकानां प्राध्यापकानां च मेलनं सञ्जातं यत्र बहवः छात्रोपयोगिनः विषयाः छात्राणां समस्यानां समाधानानि च चर्चितानि । अत्र संयोजकभारं डा. प्रमोदभट्टवर्यः निरवहत् ।

BellaBacaDesigns

- संस्कृतभारतीप्रतिनिधिभ्यां सह मेलनम् : ०४-०१-२०२४ दिने संस्कृतभारत्याः अखिलभारतसंघटनमन्त्रिणा श्रीमता जयप्रकाशमहोदयेन कर्णाटकप्रान्तसंघटनमन्त्रिणा श्रीमता लक्ष्मीनारायणमहोदयेन च परिसरमागत्य अध्यापकैः छात्रैश्च सह विचाराः कृताः । तत्र स्वामिविवेकानन्दजयन्तीम् अन्तःप्रशिक्षणं च उद्दिश्य विचाराः प्रवृत्ताः । आचार्यः हरिप्रसादवर्यः अत्र संयोजनमकार्षीत् ।

- वाक्यार्थपरिषद् : १२-०१-२०२४ दिने वाक्यार्थपरिषदः चतुर्थमधिवेशनं प्रवृत्तं यत्र आचार्यः सूर्यनारायणभट्टवर्यः, डा. वेङ्कटरमणभट्टवर्यः, डा. कृष्णानन्तपद्मनाभवर्यः, डा. विश्वनाथहेगडेवर्यः, डा. रमानन्दभट्टवर्यः इत्येतैः पञ्चभिः परिसरीयाध्यापकैः वाक्यार्थविचारः प्रस्तुतः । अस्मिन्नधिवेशने आचार्यः सूर्यनारायणभट्टमहोदयः अध्यक्षस्थानम् अलमकार्षीत् । डा. एस्. वेङ्कटेशताताचार्यवर्येण सञ्चालनं, श्री निरञ्जनभट्टमहोदयेन धन्यवादसमर्पणं च विहितम् ।

- न्यायविद्याशाखाकार्यशाला – "न्यायभाष्यानुचिन्तनम्" : १७-०१-२०२४ तः २३-०१-२०२४ पर्यन्तं न्यायविद्याशाखया न्यायभाष्यानुचिन्तनमिति विषये सप्ताहव्यापिनी कार्यशाला समायोजिता, यत्र विद्वान् उमाकान्तभट्टवर्यः, विद्वान् मधुसूदन अडिगवर्यश्च बोधकत्वेन समागतौ । अत्र न्यायभाष्यस्य प्रथमाध्यायस्य बोधनं प्रवृत्तम् । कार्यशालायाः समन्वयकः आचार्यः नवीनहोळ्ळवर्यः संयोजकौ च डा. श्यामसुन्दरवर्यः, डा. राघवेन्द्र आरोव्ळिवर्यश्च आसन् । अमेरिकादेशात् अनिलपाणिग्रहिवर्यः शृङ्गेरीस्थः राजेन्द्रवर्यश्च आधुनिकविज्ञानविषये विचारान् उपास्थापयताम् । उद्घाटनसत्रे कुलपतिवर्याणाम् आचार्याणां श्रीनिवासवरखेडीवर्याणाम् उद्बोधनं चाभूत् ।

- साहित्यविद्याशाखायाः संगोष्ठी : २०-०१-२०२४, २१-०१-२०२४ दिनयोः परिसरस्य साहित्यविद्याशाखया "संस्कृतकाव्यानि-सांप्रतिकसमाजोपयोगिता" इति विषये राष्ट्रियसंगोष्ठी समायोजिता । आचार्यः तिरुमल पि. कुलकर्णीमहोदयः संगोष्ठीमिमामुदजीघटत् । परिसरनिदेशकः आचार्यः हंसधरझामहोदयः आध्यक्ष्यं व्यधासीत् । संगोष्ठीमिमाम् आचार्या एस्. राधामहोदया, आचार्यः उमाकान्तभट्टवर्यः, आचार्यः पद्मनाभमराठेवर्यः, आचार्या श्रुतकीर्तिवर्या, डा. बङ्गारम्मा के वर्या, डा. वि. चेन्नकेशवय्यमहोदयः, डा. सूर्यहेब्बारमहोदयः, डा. पल्लालोकेशवर्यः, इत्यादयो बाह्या विद्वांसः, परिसरीयाश्च विद्वांसः स्वीयव्याख्यानैः

BellaBacaDesigns

समभूषयन् । संगोष्ठ्या अस्याः समन्वयकः आचार्यः राघवेन्द्रभट्टवर्यः आसीत् । डा. कोम्पेल्लिविनयकुमारवर्यः, डा. श्रीकर.वि महोदयश्च संयोजकावभूताम् ।

- अखण्डरामायणपारायणं दीपोत्सवश्च : अयोध्यायां श्रीरामजन्मभूमौ मन्दिरे श्रीरामचन्द्रस्य प्राणप्रतिष्ठामहोत्सवमुपलक्ष्य परिसरे २२-०१-२०२४ दिनाङ्के प्रातः ६:०० वादनप्रभृति २४-०१-२०२४ प्रातः १०:०० वादनपर्यन्तमखण्डतया श्रीमद्वाल्मीकिरामायणपारायणं प्रवृत्तं यत्र परिसरस्य निदेशकाः प्राध्यापकाः छात्राः, सामाजिकाश्च सभक्तिश्रद्धं भागमगृह्णन् । पारायणं मङ्गलपूजामनु कुलपतीनाम् आचार्यश्रीनिवासवरखेडीमहोदयानामुद्बोधनोत्तरमारब्धम् । पारायणान्ते श्रीरामचन्द्रपूजनं सभाकार्यक्रमश्च आयोजिते । तत्र शृङ्गेरीस्थानां त्रयाणां कारसेवकानां श्रीराजशेखरसुरेशकामतनीलकण्ठानां सम्माननं तेषामनुभवकथनं च कारितम् । अयं कार्यक्रमः छात्रकल्याणपरिषत्पक्षतः समायोजितः । तत्र डा. उमामहेश्वर एन्. वर्यस्य विशिष्टं संयोजकत्वमासीत् । भजनं, विशिष्टभोजनं, २२-०१-२४ दिने सायं दीपोत्सवः इत्येतेऽपि कार्यक्रमा आयोजिता आसन् ।

- विकसितभारतविषये भाषणस्पर्धा : "विकसितभारत-२०४७" योजनान्तर्गतत्वेन २५-०१-२४ दिनाङ्के "भारतविकासयात्रायां संस्कृतस्य योगदानम्" इति विषये भाषणस्पर्धा आयोजिता । तत्र प्रथमद्वितीयतृतीयपुरस्कारविजेतृभ्यः क्रमशः रू.१०००, रू७००, रू.५०० धनराशिः प्रदत्तः । प्राप्तपुरस्कारा इमे छात्राः अखिलभारतस्तरे भाषणस्पर्धार्थं चिताः सन्ति –

  सुदर्शन एम् एस्

  श्रावणी देशपाण्डे

  सौभाग्यरञ्जन सामन्तराय

  अस्य कार्यक्रमस्य संयोजकः आचार्यः हरिप्रसादवर्यः आसीत् ।

- वेदान्तविद्याशाखासङ्गोष्ठी : वेदान्तविद्याशाखा २६-०१-२४, २७-०१–२४ दिनयोः "श्रीसुरेश्वराचार्याणां ग्रन्थेषु प्रतिपादिताः लोकोपकारकाः वेदान्तसिद्धान्ताः" इति विषये राष्ट्रियसङ्गोष्ठीं समायोजयत् । तत्र उद्घाटकत्वेन आचार्यः महाबलेश्वर पि. भट्टवर्यः समागतः, आचार्यः सि. एस्. एस्. नरसिंहमूर्तिवर्यश्च अध्यक्षतां निरवहत् । संगोष्ठ्यामस्याम् आचार्यः बालीगद्दे शङ्करभट्टवर्यः, डा. पुष्करदेवपुजारीवर्यः, डा.

BellaBacaDesigns

आर्. नवीनवर्यः, डा. आदित्यसुतारावर्य इत्यादयः बाह्याः, परिसरीया विद्वांसः, शोधच्छात्राश्च पत्रप्रस्तुतिमकार्षुः । अस्याः समन्वयकः आचार्यः गणेश ईश्वरभट्टवर्यः आसीत् । डा. विश्वनाथ हेगडे, डा. निरञ्जनभट्टश्च संयोजकौ आस्ताम् ।

- गणतन्त्रदिवसोत्सवः – २६-०१-२४ दिनाङ्के परिसरे गणतन्त्रदिवसोत्सवः निदेशकद्वारा ध्वजोत्तोलनपूर्वकं समाचरितः । डा. वेङ्कटरमणभट्टवर्यः डा. रामचन्द्र हेच्. डी वर्यश्च अत्र संयोजकावास्ताम् ।

- 28-1-24 दिनाङ्कतः 3-2-24 दिनाङ्कपर्यन्तं “हठयोगपरम्परायाश्चिन्तनमभ्यासश्च” इति विषये योगविज्ञानविद्याशाखापक्षतः कार्यशाला समायोजिता । तत्र घेरण्डसंहितां हठयोगप्रदीपिकां चानुसृत्य हठयोगस्य अध्ययनं कृतम्, प्रयोगश्च कारितः । अवान्तररूपेण योगस्य विविधशाखाविषया अपि अध्यापिताः । अत्र 80 प्रतिभागिनः भागमगृह्णन् । अत्र विविधेषु सत्रेषु आचार्यः कोटेमने रामचन्द्रभट्टाः, डा. धनेशवर्यः, आचार्यः जयरामवर्यः, डा. नवनीतकुमारवर्यः, डा. मणिकान्तवर्यः, आचार्यः कृष्णशर्मवर्यः, श्रीसुब्रह्मण्यवर्यः, डा. वेङ्कटरमणभट्टवर्य इत्येते योगस्य विश्रुता विद्वांसः पाठान् अपाठयन् आसनमुद्राप्राणायामशोधनाक्रियाश्च अशिक्षयन् । मुक्तस्वाध्यायपीठस्य प्राध्यापकेन श्रीगोपालकृष्णवर्येण बहुषु प्रायोगिकसत्रेसु प्रशिक्षणं दत्तम् । अत्र उद्घाटनसत्रे आचार्यः नरसिंहमूर्तिवर्यः आध्यक्ष्यं निरवहत् । अस्याः कार्यशालायाः मार्गदर्शकः निदेशकः हंसधरझावर्यः, समन्वयकः नवीनहोळ्ळवर्यः, संयोजकः डा.शैलेशपवारवर्यः, सहसंयोजकौ डा. निरञ्जनभट्टवर्यः, डा. रामचन्द्र एच् डी वर्यश्च आसन् । अन्ते प्रतिभागिनां परीक्षापि कारिता ।

- 5-2-24 दिनाङ्कतः 11-2-24 दिनाङ्कपर्यन्तं “चापीयत्रिकोणमितिः, बृहज्जातकस्य दशाध्यायीव्याख्याया अध्ययनं च” इति विषये ज्यौतिषविद्याशाखापक्षतः कार्यशाला समायोजिता यत्र 80 प्रतिभागिनः भागमग्रहीषुः । कार्यशालायामस्याम् आचार्यः ईश्वरभट्टवर्यः, आचार्यः श्यामदेवमिश्रवर्यः, आचार्यः विजेन्द्रशर्मवर्यः, डा. रामकृष्णपेजात्तायवर्यः, डा. के सी नागेशवर्यः, डा. प्रवेशव्यासवर्य इत्येते बाह्या विद्वांसः ग्रन्थभागान् अबूबुधन् । उद्घाटनसत्रे निदेशकः आचार्यः हंसधरझामहोदयः दिक्सूचीभाषाणमकरोत् आचार्यः सि. एस्. एस्. नरसिंहमूर्तिमहोदयश्च अध्यक्षतां निरवहन् । अत्र कार्यशालायां संयोजकत्वं डा. विजयानन्द अडिगमहोदयेन विहितम् । अन्ये च विद्याशाखासदस्याः, डा. ब्रजेश पाठकमहोदयः, डा. सुधांशुकुमारनन्दमहोदयः,

BellaBacaDesigns

डा. रमानन्दभट्टवर्यः, डा. नागपति हेगडेवर्य इत्येते तत्तत्सत्रसञ्चालनादिकं कृत्वा कार्यशालामिमां सफलामकुर्वन् ।

- 9-2-24 दिने Institute for Indic Knowledge Studies, MIT पक्षतः आयोजिते छात्रैः सह संवादकार्यक्रमे श्रीधनञ्जय आचार्यमहोदयः B.Sc in Vedic Sciences इति पाठ्यक्रमस्य परिचयमकारयत् । अत्र सत्राध्यक्षत्वं आचार्येण नरसिंहमूर्तिवर्येण ऊढम् । डा. विश्वनाथ हेगडेवर्यः संयोजक आसीत् ।

- 8-2-24 दिनाङ्के 15-2-24 दिनाङ्के च छात्रैः वाग्वर्धिनीसभायां शास्त्रीयविषया उपस्थापिताः ।

- 16-2-24 दिनाङ्के वाक्यार्थपरिषदः पञ्चमाधिवेशनं समायोजितं यत्र आचार्यः चन्द्रशेखरभट्टवर्यः, डा. वेङ्कटेशताताचार्यवर्यः, डा. राघवेन्द्र पि. आरोळ्ळिवर्यः, श्री ब्रजेश पाठकवर्यः, डा. उमामहेश्वर रावुवर्य इत्येते पञ्च प्राध्यापकाः आदर्शवाक्यार्थान् उपास्थापयन् ।

- 23-2-24 दिने अभिभावकप्राध्यापकसमावेशः प्रवृत्तः ।

- व्याकरणविद्याशाखया "महाभाष्यस्य कारकाह्निकस्य अध्ययनम्" इति विषये 26.2.24 तः 3.3.24 पर्यन्तं कार्यशाला समायोजिता । अत्र शृङ्गेरीश्रीमठस्य सद्विद्यासंजीविनीसंस्कृतमहापाठशालायाः आचार्याः नागराजभट्टाः, तस्या एव पाठशालाया अध्यक्षाः आचार्याः विनायक उडुपवर्याः, केरलस्थश्रीशङ्कराचार्यसंस्कृतविश्वविद्यालस्य आचार्याः विष्णुनम्बूदिरिवर्याः, बेङ्गलूरुचेन्नेनहळ्ळीस्थवेदविज्ञानगुरुकुलस्य आचार्यः शम्भुनाथभट्टश्च पाठान् अबोधयन् ।

- श्रीराजीवगान्धीपरिसरे 4.3.24 दिने राष्ट्रियसेवायोजनायाः केन्द्रस्य उद्घाटनकार्यक्रमः संपन्नः । तत्र उद्घाटकत्वेन कर्णाटकराज्यस्य राष्ट्रियसेवायोजनाया अधिकारी डा. प्रतापलिङ्गय्यमहोदयः आहूतः । शृङ्गेरीस्थसर्वकारीयचिकित्सालयस्य प्रशासकः डा. श्रीनिवासमहोदयः मुख्याभ्यागतः आसीत् । जे. सी. बी. एम्. महाविद्यालयस्य प्राचार्यः डा. प्रशान्तजी महोदयश्च

अभ्यागतः आसीत् । परिसरनिर्देशकः आचार्यः हंसधरझामहोदयः कार्यक्रमस्य अध्यक्षतां निरवहत् । केन्द्रस्यास्य मार्गदर्शकः आचार्यः रामचन्द्रुलबालाजी महोदयः, अधिकारी डा. अरविन्दकुमारसोमदत्तमहोदयश्च वर्तेते । अनेन राष्ट्रियसेवायोजनाकेन्द्रेण 5.3.24 दिने परिसरे रक्तदानशिबिरमपि आयोजितम् ।

- केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरेण, मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयेन च मिलित्वा 22.3.24 तः 28.3.24 पर्यन्तं "न्यायामृताद्वैतसिद्धिग्रन्थयोः पञ्चमिथ्यात्वलक्षणविचारः" इति विषये राष्ट्रियकार्यशाला समायोजिता । तत्र च विद्वान् एम्. ए. नागराजभट्टवर्यः, आचार्यः नवीनहोळ्ळवर्यः, डा. महेश्वरन् के. एस्. महोदयः, विद्वान् श्रीहरि शिवरामधायगुडेमहोदयः, विद्वान् कार्तिकशर्ममहोदयः, इत्येते अद्वैतसिद्धिरीत्या विषयमुपास्थापयन् । न्यायामृतरीत्या विषयोपस्थापकाश्च विद्वांसः – आचार्यः नारायणपूजारमहोदयः, डा. रङ्गनाथगणाचारिवर्यः, डा. प्रह्लादजोशीवर्यः, डा. श्रीहरि आर्. वल्वेकरमहोदयः, डा. एल्. सुधीन्द्राचार्यश्च इत्येते आसन् । समापनसमारोहे आचार्यः रामकिशोरत्रिपाठिमहोदयः मुख्याभ्यागतरूपेण सम्मिलितः आसीत् । परिसरनिदेशकः आचार्यः हंसधरझावर्यः उद्घाटने समापने च आध्यक्ष्यं निरवहत् । आचार्यः के. के. शैनमहोदयः समापने विशिष्टातिथित्वेन उपस्थितः । आहत्य अनया कार्यशालया 118 प्रतिभागिनः लाभान्विता अभूवन् ।

- 16.3.24 तः 30.3.24 पर्यन्तं मीमांसाविद्याशाखया "श्रीमदप्पय्यदीक्षितविरचितस्य विधिरसायनस्य अध्ययनम्" इति विषये कार्यशाला आयोजिता यया 27 प्रतिभागिनः लाभान्विता अभूवन् । कार्यशालाङ्गत्वेन प्रतिभागिनां संगोष्ठी अपि आयोजिता यत्र महामहोपाध्यायाः आचार्याः मणिद्राविडशास्त्रिणः, आचार्यः सुब्राय वि भट्टवर्यः, आचार्यः देन्दुकोरिनारायणशर्ममहोदयश्च परीक्षकत्वेन समुपस्थिताः । कार्यशालायामस्यां डा. एस्, वेङ्कटेशताताचार्यवर्यः विधिरसायनग्रन्थमपाठयत् । आचार्यः सूर्यनारायणभट्टवर्यः उद्घाटनसत्रे ग्रन्थकारपरिचयमकारयत् । उद्घाटने परिसरनिदेशकः आचार्यः हंसधरझावर्यः, उपसंहारे आचार्यः चन्द्रकान्तमहोदयश्च अध्यक्षतां निरवहताम् ।

- 15.3.24 दिने वाक्यार्थपरिषदः षष्ठम् अधिवेशनं प्रवृत्तं यत्र आचार्यः रामचन्द्रुलबालाजीवर्यः शिक्षाशास्त्रे समायोजनम् इति विषयम्, आचार्यः हरिप्रसादवर्यः व्यक्तित्वोत्कर्षकाणि मूल्यानि इति विषयम्, डा. नारायणराय्करवर्यः

न्यायकुसुमाञ्जलिग्रन्थोक्तरीत्या उपमानप्रमाणस्य ईश्वरबाधकतानिराकरणम् इति विषयम्, डा. दुर्गाशिरणरथवर्यः निरुक्तदिशा देवतातत्वनिर्णयः इति विषयम्, डा. सुधांशुकुमारनन्दवर्यः वास्तुशास्त्रे द्वारस्थापनविचारः इत्यमुं च विषयम् उपास्थापयन् । अस्मिन्नधिवेशने आचार्यः रामचन्द्रुलबालाजीमहोदयः आध्यक्ष्यं निरवक्षत् ।

- 2-4-24 दिने वाक्यार्थपरिषदः सप्तममधिवेशनं प्रवृत्तं यत्र वेदान्तविद्याशाखाध्यक्षस्य आचार्यस्य गणेश ईश्वर भट्टवर्यस्य अध्यक्षत्वे पञ्चभिः परिसरीयाध्यापकैः शास्त्रवाक्यार्थाः उपस्थापिताः ।

- 12-4-24 दिने वाक्यार्थपरिषदः अष्टममधिवेशनं संवृत्तं यत्र साहित्यविद्याशाखाध्यक्षस्य आचार्यस्य राघवेन्द्रभट्टवर्यस्य अध्यक्षत्वे चतुर्भिरध्यापकैः वाक्यार्थाः प्रस्तुताः ।

- 9-4-24, 10-4-24 दिनयोः श्रीरामनवमीमुद्दिश्य परिसरे छात्रकल्याणपरिषदा श्रीरामचरितमानसस्य अखण्डपारायणमायोजितम् यत्र परिसरसदस्या भक्त्या भागमगृह्णन् ।

- 16-4-24 दिने परिसरस्य वार्षिकोत्सवः संपन्नः यत्र दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराः जगद्गुरवः श्री. विधुशेखरभारतीमहास्वामिनः परिसरमागत्य स्वीयेन आकर्षकेण गम्भीरेण प्रेरकेण च भाषणेन परिसरीयान् सर्वान् सदस्यान् अन्वगृह्णन् । शास्त्रज्ञानस्य आवश्यकत्वं, ज्ञानेन सह विनयस्य आवश्यकता, शास्त्राणामनन्तत्वं, तदध्ययनस्य अवश्यफलप्रदायित्वमित्यादीन् बहून् विषयान् जगद्गुरुश्रीचरणाः ललितया शैल्या कथोपन्यासपूर्वकमबूबुधन् । अत्र कार्यक्रमे काशीहिन्दूविश्वविद्यालयस्य तेलुगुविभागस्य आचार्याः चल्ला श्रीरामचन्द्रमूर्तिवर्याः मुख्याभ्यागताः, अस्माकं विश्वविद्यालयस्य कुलपतय आचार्याः श्रीनिवासवरखेडीमहोदयाश्च सारस्वताभ्यागता अभूवन् । जगद्गुरुश्रीचरणानां सान्निध्ये विश्वविद्यालयीयपरीक्षा आधृत्य छात्रेभ्यः स्वर्णपदकानि अन्ये विशिष्टपुरस्काराश्च दत्तानि । ततः विविधस्पर्धासु विजेतृभ्यः पुरस्कारान् वितीर्य सायं सांस्कृतिककार्यक्रमा आयोजिता आसन् ।

BellaBacaDesigns

BellaBacaDesigns

- 17-4-24 दिने वाग्वर्धिनीस्पर्धिष्णुवाक्यार्थपरिषदां (छात्रकल्याणपरिषदः) समापनसमारोहः वाग्वर्धिनीमहोत्सवनाम्ना अनुष्ठितः । तत्रापि आचार्याः चल्ला रामचन्द्रमूर्तिवर्या एव अभ्यागतभाषणमकार्षुः । परिसरनिदेशकैः आचार्यहंसधरझामहोदयैः अध्यक्षभाषणं विहितम् । सायं छात्रैः सांस्कृतिककार्यक्रमा अपि प्रदर्शिताः ।

- 14/05/24 दिनाङ्के श्रीराजीवगान्धीपरिसरे श्रीशङ्कराचार्यजयन्तीकार्यक्रमः श्रीशारदाम्बाश्रीशङ्कराचार्यप्रतिमापूजनपूर्वकं समाचरितः । तत्र वेदान्तविद्याशाखाध्यक्षेण आचार्यगणेश ईश्वरभट्टवर्येण श्रीशङ्कराचार्याणामवतारभूमिकामाहात्म्यादिविषये उपन्यासो विहितः । ततः शिक्षाशास्त्रविद्याशाखाया आचार्ययोः श्रीचन्द्रकान्तहरिप्रसादवर्ययोः श्रीशङ्कराचार्यस्तोत्रप्रभावविषयकव्याख्यानानन्तरं परिसरनिदेशकस्य आचार्यहंसधरझामहोदयस्य श्रीशङ्कराचार्याणां मिथिलादेशसम्बन्धकथनपूर्वकमध्यक्षभाषणं संपन्नम् । कार्यक्रमस्य संयोजकश्च वेदान्तप्राध्यापकः डा. निरञ्जनभट्टवर्यः आसीत् ।

- 29/04/24 तः 06/05/24 पर्यन्तं Manipal Academy of Higher Education (MAHE) संस्थायाः सहयोगेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन प्रशिक्षणकार्यशाला समायोजिता । इयं कार्यशाला दिनत्रयं मणिपाले दिनत्रयञ्च शृङ्गेर्यां श्रीराजीवगान्धीपरिसरे संपन्ना । कार्यशालेयं कुलपतिवर्यस्य आचार्यस्य श्रीनिवासवरखेडीमहोदयस्य उद्बोधनेन उद्घाटिता । अस्यां कार्यशालायाम् आन्तर्जालिकपाठ्यसामग्रीनिर्माणादिविषयान् उदबूबुधन् विद्वांसः । MAHE संस्थायां निदेशकः डा. मनोजकुमार नागसम्पिगेवर्यः, संयुक्तनिदेशिका अरुणावर्या, डा. गिरिधरकिणिवर्यः , परिसरनिदेशकः आचार्यः हंसधरझावर्यः, मुक्तस्वाध्यायपीठनिदेशकः आचार्यः रत्नमोहनझामहोदयः, संयुक्तनिदेशकः श्रीवेङ्कटेशमूर्तिमहोदयः, अन्ये च मुक्तस्वाध्यायपीठसदस्याः विविधैः प्रकारैः कार्यक्रमममिमभूषयन् ।

- 18-06-24 दिनाङ्के 2024-25 शैक्षिकसत्रारम्भमुद्दिश्य श्रीशारदाम्बागुरुपादुकापूजनमायोजितम् । तत्र सर्वे परिसरसदस्याः उपातिष्ठन् । परिसरनिदेशकः आचार्यः हंसधरझावर्यः सत्रारम्भोद्घोषमकार्षीत् । आचार्येण सूर्यनारायणभट्टवर्येण कार्यक्रमः संयोजितः ।

BellaBacaDesigns

- 20-05-24 तः 19-06-24 पर्यन्तं परिसरे वेदान्तविद्याशाखायाम् अद्वैतसिद्धिग्रन्थस्य प्रशिक्षणवर्गः आयोजितः यत्र 24 प्रशिक्षणार्थिनः भागमगृह्णन् । अस्मिन् वर्गे अध्यापनसत्राणि, चर्चासत्राणि, परीक्षा, शलाकापरीक्षा, छात्रां प्रस्तुतिश्च आयोजितानि । विशिष्टव्याख्यानमपि आयोजितम् । अस्मिन् वर्गे आचार्यः महाबलेश्वपि भट्टवर्यः, आचार्यः गणेश ईश्वरभट्टवर्यः, आचार्यः राजारामशुक्लवर्यः, आचार्यः गणपतिभट्टवर्यः, डा. कार्तिकशर्मवर्य, डा. पुष्करदेवपूजारिवर्यः, डा. पी.आर् वासुदेवन् महोदयः, आचार्यः सतीशवर्यः, आचार्यः मणिद्राविडवर्यः, डा. महेश्वरन् नम्पूतिरिवर्यः, डा. विश्वनाथहेगडेवर्यः इत्यादयो विद्वांसः व्याख्यानमकार्षुः । समग्रः कार्यक्रमः कुलपतिवर्यस्य आचार्यश्रीनिवासवरखेडीमहोदयस्य मार्गदर्शने निदेशकवर्यस्य आचार्यहंसधरझामहोदयस्य अध्यक्षत्वे च संपन्नः ।

- 26-06-24 तः 28-06-24 पर्यन्तं परिसरनिदेशकचराणां व्याकरणविद्याशाखाया आचार्याणां सि. एस्. एस्. नरसिंहमूर्तिमहोदयानां सर्वकारीयसेवानिवृत्तिमुपलक्ष्य व्याकरणाध्ययनराष्ट्रियकार्यशाला धात्वाख्यातार्थसङ्गोष्ठी च समायोजिते । तत्र विद्वान् नागराजभट्टवर्यः, आचार्यः जानमद्दि रामकृष्णमहोदयः, विद्वान् विनायक उडुपमहोदयः इत्यादयो विद्वांसो व्याख्यानानि अकार्षुः । बहवो विद्वांसः छात्राश्च पत्राणि प्रास्तुवन् । कार्यक्रमस्य संयोजकौ डा. कृष्णानन्तपद्मनाभवर्यः डा. प्रमोदभट्टवर्यश्च आस्ताम् ।

- 28-06-24 दिनाङ्के आचार्याणां सि.एस्.एस्. नरसिंहमूर्तिमहोदयानां सेवानिवृत्तिकार्यक्रमः वैभवेन समाचरितः । निदेशकप्रभृतयः परिसरसदस्याः आचार्याणां सम्माननमकार्षुः । आचार्यैः सर्वेषां कृते विशेषभोजनव्यवस्था कृता ।

- 21-06-24 दिनाङ्के निदेशकस्य आचार्य हंसधरझावर्यस्य आध्यक्ष्ये अन्ताराष्ट्रिययोगदिवसकार्यक्रमः आयोजितः । तत्र डा. गोपालकृष्णहङ्गारीमहोदयेन योगस्य महत्त्वविषये व्याख्यानं विहितम् । आचार्यरामचन्द्रुलबालाजीमहोदयेन कार्यक्रमसंयोजनं विहितम् ।

- 25-06-24 दिनाङ्के परिसरे C.P.W.D अधिकारिभिः सह समावेशः सञ्जातः, यत्र परिसरस्य निर्मीयमाणनूतनभवनविषये अन्येषु च विषयेषु विस्तरेण चर्चा विहिता ।

BellaBacaDesigns

तस्मिन् समावेशे निदेशकः, C.P.W.D अभियन्तारः इत्यादयः आहत्य 12 सदस्याः समवेता अभूवन् ।






(गीता-ओलम्पियाड् उद्घाटनं पश्यन्तः परिसरस्य अध्यापकाश्छात्राश्च)







(अभिभावकाध्यापकसंघस्य समावेशः)




(वाग्वर्धिनीपरिषत् – कनिष्ठस्तरः)

BellaBacaDesigns




(वाक्यार्थपरिषदः चतुर्थम् अधिवेशनम्)



BellaBacaDesigns




(संसदः अधिनियमेन स्थापितः)
श्रीराजीवगान्धीपरिसरः
शृङ्गेरी - ५७७१३९


केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)
श्रीराजीवगान्धीपरिसरः
शृङ्गेरी - ५७७१३९



(न्यायकार्यशाला)




(साहित्यकार्यशाला)





BellaBacaDesigns






(अखण्डरामायणपारायणं दीपोत्सवश्च)



BellaBacaDesigns






(वेदान्तसङ्गोष्ठी)

BellaBacaDesigns




BellaBacaDesigns

BellaBacaDesigns




(गणतन्त्रदिवसोत्सवः)




BellaBacaDesigns

BellaBacaDesigns







)“महाभाष्यस्य कारकाह्निकस्याध्ययनम्” इति विषयिण्याः व्याकरणविद्याशाखीयायाः कार्यशालायाः उद्घाटनसत्रम्)

BellaBacaDesigns




(राष्ट्रियसेवायोजनायाः केन्द्रस्य उद्घाटनकार्यक्रमः)





(राष्ट्रियसेवायोजनाकेन्द्रेण परिसरे आयोजितं रक्तदानशिबिरम्)


केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितम्
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी
आदर्शसंस्कृतमहाविद्यालयः, भारतीयविद्याभवनम्, मुम्बई
इत्यनयोः संयुक्ततत्त्वावधानेन समायोज्यमाना
अद्वैतवेदान्तविद्याशाखीया सप्तदिवसीया राष्ट्रियकार्यशाला
न्यायामृताद्वैतसिद्धिग्रन्थयोः पञ्चमिथ्यात्वलक्षणविचारः
22-03-2024
GPS Map Camera
Sringeri, Karnataka, India
C79C+6V4, Sringeri, Menase, Karnataka 577139, India
Lat 13.417954°
Long 75.27223°
22/03/24 12:02 PM GMT +05:30
Google


केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितम्
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी
मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, भारतीयविद्याभवनम्, मुम्बई
GPS Map Camera
Sringeri, Karnataka, India
C79C+6V4, Sringeri, Menase, Karnataka 577139, India
Lat 13.417948°
Long 75.272246°
25/03/24 01:10 PM GMT +05:30
Google

BellaBacaDesigns






(न्यायामृताद्वैतसिद्धिग्रन्थयोः पञ्चमिथ्यात्वलक्षणविचारः इति विषयिण्यां कार्यशालायाम् अध्यापकाः विद्वांसः,   छात्राश्च)

BellaBacaDesigns

BellaBacaDesigns






)“श्रीमदप्पय्यदीक्षितविरचितस्य विधिरसायनस्य अध्ययनम्” इति विषयिण्यां कार्यशालायां प्रवृता संगोष्ठी)

BellaBacaDesigns

BellaBacaDesigns




(वाक्यार्थपरिषदः षष्ठम् अधिवेशनम्)




BellaBacaDesigns







BellaBacaDesigns

BellaBacaDesigns







BellaBacaDesigns

BellaBacaDesigns







BellaBacaDesigns

BellaBacaDesigns







BellaBacaDesigns







BellaBacaDesigns







BellaBacaDesigns
BellaBacaDesigns







(श्रीशङ्कराचार्यजयन्तीकार्यक्रमे अध्यक्षभाषणं कुर्वन्परिसरनिदेशकः आचार्यहंसधरझावर्यः)

BellaBacaDesigns

BellaBacaDesigns




(श्रीशङ्कराचार्यजयन्तीकार्यक्रमे उपन्यस्यन् आचार्यः गणेश ईश्वरभट्टवर्यः)




(कार्यशालायां प्रशिक्षणार्थिनः उद्बोधयन् कुलपतिः आचार्यः श्रीनिवासः वरखेडी)

BellaBacaDesigns



(कार्यशालायां भागग्राही मुक्तस्वाध्यायपीठसदस्यसमूहः)

अध्यापकानामुपलब्धयः

1. वेदाङ्गवेदभाष्यविद्याशाखायाः सहायकाचार्यः डा. दुर्गाशिरणरथमहोदयः उत्तरप्रदेशसंस्कृतसंस्थानस्य पञ्चाशत्सहस्ररूप्यकात्मकस्य वेदपण्डितपुरस्कारस्य कृते परीक्ष्य चितः ।

2. पुरस्काराः –

    i. परिसरस्य साहित्यविद्याशाखायाः आचार्यः श्री राघवेन्द्रभट्टवर्यः शिक्षाविभूषणाख्येन कुलपतिपुरस्कारेण 7.3.24 दिने विश्वविद्यालयस्य प्रथमदीक्षान्तसमारोहावसरे विभूषितः ।
    ii. व्याकरणविद्याशाखाया आचार्यः चन्द्रशेखरभट्टवर्यः शिक्षाभूषणाख्येन कुलपतिपुरस्कारेण सभाजितः ।

3. पुस्तकप्रकाशनानि –

    i. न्यायविद्याशाखायाः अतिथिप्राध्यापकेन डा. राघवेन्द्र पि. अरोळ्ळिमहोदयेन के. आर्. नगरस्थवेदान्तभारतीसंस्थाद्वारा "अध्यास" इति ग्रन्थः प्रकाशितः ।

ii. व्याकरणस्य संविदाप्राध्यापिका डा. शिवकुमारी काटूरीवर्या चिन्मया इण्टर्नेशनल् फौण्डेशन् द्वारा "भगवद्गीतायाव्युत्पत्तिज्ञानकोशः" इति ग्रन्थं प्राचीकशत् ।

4. परिसरस्य न्यायविद्याशाखायाःअतिथिसहायकाचार्यः डा. राघवेन्द्र पि. आरोळ्ळिवर्यः 13/4/24 दिनाङ्के "अभिनवविद्यातीर्थ फाउण्डेशन" इति संस्थया विद्याभारतीपुरस्कारेण सम्मानितः ।

5. देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे प्रचालिते न्यायशास्त्रप्रशिक्षणवर्गे न्यायविद्याशाखाप्राध्यापकः डा. श्यामसुन्दर ए महोदयः 20/05/24 तः 25/05/24 पर्यन्तं व्याख्यानमकार्षीत् ।

6. मीमांसाविद्याशाखायाः आचार्यः डा. सुब्राय वि भट्टमहोदयः, आचार्यः सूर्यनारायणभट्टमहोदयः, डा. गोविन्द जि हेगडेमहोदयश्च 27/05/24 तः 29/05/24 पर्यन्तं श्रीसोन्दास्वर्णवल्लीमठे प्रवृत्तायां राष्ट्रियवाक्यार्थसभायां वाक्यार्थप्रस्तुतिमकुर्वन् ।

7. मीमांसाविद्याशाखायाः डा. वेङ्कटेशताताचार्यमहोदयः श्रीकाञ्चीशङ्कराचार्यमठे 22/05/24 तः 24/05/24 पर्यन्तं प्रवृत्तायां विद्वत्सभायां निमित्तप्रत्यक्षौत्पत्तिकसूत्राणां व्याख्या इति विषये विचारं प्रास्तौत् ।

8. मीमांसाविद्याशाखायाः डा. गोविन्द जि हेगडेवर्यः कालट्यां श्रीशृङ्गेरीशङ्कराचार्यमठे प्रवृत्तायां वाक्यार्थसभायां 10/05/24 दिनाङ्के अपूर्वनियमपरिसंख्याविधिलक्षणमिति विषये वाक्यार्थं प्रास्तावीत् ।

9. परिसरनिदेशकः आचार्यः हंसधरझावर्यः शिक्षाशास्त्रस्य आचार्यः हरिप्रसादः के महोदयश्च केन्द्रीयसंस्कृतविश्वविद्यालयेन GNEC, IIT रूडकी, ग्रेटर नोएडा इत्यत्र आयोजिते निदेशकानामन्येषां च अधिकारिणामुपवेशने भागमग्रहीष्टाम् ।

10. मीमांसाविद्याशाखायाः आचार्यः सूर्यनारायणभट्टवर्यः परिसरे 27-06-24 दिनाङ्के प्रवृत्तायां व्याकरणशास्त्रसङ्गोष्ठ्यां पत्रप्रस्तुतिमकरोत् ।

BellaBacaDesigns

11. मीमांसाविद्याशाखायाः सहायकाचार्यः वेङ्कटेशताताचार्यवर्यः चेन्नैनगरे श्रीमदाण्डवन्-आश्रमे प्रवृत्ते सामान्यशास्त्रविद्वत्सदसि 04-06-24 दिनाङ्के "निमित्तादिसूत्राणां वृत्तिकारव्याख्या" इति विषयं प्रास्तौत् ।

12. न्यायविद्याशाखायाः आचार्यः नवीनहोळ्ळमहोदयः देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे न्यायशास्त्रप्रशिक्षणवर्गे 16,17-06-24 दिनयोः विशिष्टं व्याख्यानमकरोत् ।

13. न्यायविद्याशाखायाः अतिथिसहायकाचार्यः डा. राघवेन्द्र पि आरोळ्ळिवर्यः श्रीरघुनाथकीर्तिपरिसरे न्यायशास्त्रप्रशिक्षणवर्गे 01-06-24 तः .06-06-24 पर्यन्तं व्याख्यानमकार्षीत् । तथा कश्मीरेषु टीटवाले श्रीशारदावर्षाभिषेकसभायां 22-06-24 तः 25-06-24 पर्यन्तं प्रवृत्तायां वाक्यार्थं च प्रास्तौत् ।

14. योगविज्ञानस्य संविदासहायकाचार्यः डा. शैलेशपवारवर्यः वरिष्ठलिपिका श्रीमती मञ्जुला एस् महोदया च परिसरीयच्छात्रदलेन सह हिमाचलप्रदेशे गरल्यां वेदव्यासपरिसरे 20,21 -06-24 दिनाङ्कयोः प्रवृत्ते अन्ताराष्ट्रिययोगदिवसकार्यक्रमे भागं गृहीतवन्तौ ।

BellaBacaDesigns
BellaBacaDesigns